श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री मुक्कूर् लक्ष्मीनृसिंहस्वामिना अनुगृहीतं

# ॥ श्री पुत्रप्राप्त्यष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पुत्रप्राप्त्यष्टकम् ॥

प्रह्लाद वरदं श्रेष्ठं राज्यलक्ष्म्या समन्वितम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 1 ॥

भरद्वाज हृदयान्ते वासिनं वासवानुजम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 2 ॥

सुश्रोण्या पूजितं नित्यं सर्वकामदुघं हरिं
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 3 ॥

महायज्ञ स्वरूपं तं गुहायां नित्य वासिनम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 4 ॥

कृष्णा तीर विहारं तं कृष्णां रक्षितवान् स्वयम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 5 ॥

यममोहित क्षेत्रेऽस्मिन् नित्य वास प्रियं परम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 6 ॥

चक्रिणा पूजितं सम्यक् चक्रिणं सर्वतोमुखम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 7 ॥

योगानन्दं नित्यानन्दं निगमागम सेवितम्
पुत्रार्थं प्रार्थये देवं मट्टपल्याधिपं हरिम् ॥
सुतं देहि ! सुतं देहि ! सुतं देहि ! ॥ 8 ॥

श्री नृसिंहं हृदि ध्यात्वा मुक्कूर् नृहरिणा कृतम्
ये पठन्त्यष्टकं नित्यं इष्टप्राप्तिर्भविष्यति ॥ 9 ॥

॥ श्री पुत्रप्राप्त्यष्टकं समाप्तम् ॥